International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(5): 225-227
© 2025 IJSR
www.anantaajournal.com
Received: 18-09-2025
Accepted: 17-10-2025

**Lingareddy Uma Maheswari**
Department of Agama, National Sanskrit University Tirupati, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Lingareddy Uma Maheswari**
Department of Agama, National Sanskrit University Tirupati, Tirupati, Andhra Pradesh, India

# श्रीवैखानसकल्पसूत्रम्

## Lingareddy Uma Maheswari

### प्रस्तावना

सर्वैः ज्ञायते यत् सर्वेषाम् इहपरसाधनसंसर्गसोपानभूतः वैदिकक्रियामार्गनिर्वहणरूपः भगवद्रूपसन्दर्शनलाभः चित्तनैर्मल्यसाधनभूतज्ञानराशिसर्वस्वः आगम इति।

भगवद्रूपसंसाधनद्वारा अर्चन-अभिषेक-महोत्सव-विशेषाराधनक्रियाभिः देवताभेदेन असौ नौकविधः भिद्यते शैव-वौष्णव-शाक्त-गाणापत्य-सौर-कौमारादिभेदेन। दक्षिणभरते लब्धप्रतिष्ठौ द्वौ शैव-वैष्णवौ एव।

शिवस्य अराधनाद्वरा कैलासप्राप्तिः शिवतत्त्वसंसाधनद्वारा ज्ञानलाभः शिवस्य मन्दिरानिर्माणद्वारा सौभाग्यसिद्धिः सञ्जायत इति शैवागम उपदिशति।

तत्र द्विधा विभक्तः वैष्णवागमः वैखानस-पाञ्चरात्र इति । पाञ्चरात्रं तावत् अज्ञाननाशकं विज्ञानप्रदायकं तन्त्र-मन्त्र-आगम तन्त्रान्तरभेदैः श्रीमन्नारायाणोपदेशसंहितानामभि: ग्रन्थैश्च राराजति।

वैखानसं तावत् विष्णुपारम्यप्रतिपादकं शब्दप्रमाणसहितं मन्त्रविनियोगासर्वस्वं च भवतीति ज्ञायते। वैखानसस्यास्य आधारभूतं श्रीवैखानसकल्पसूत्रं स्यात् । इदं सूत्रं विखनोमुनिना उपदिष्टमभूत । इदं द्वात्रिंशत् प्रश्नैः सूत्रैः गृह्य-धर्म-प्रवर-श्रौतेति चतुर्भि: विभक्तं च।

आपस्तम्ब-बोधायन-कात्यायनादिसूत्रेषु इदं वैखानसं सूत्रं विशिष्टं प्रधानतमं सर्वैः मानितमाद्यम् इति दशमशताब्दे विद्यमानः श्रीश्रीनिवामखिः दशभिः हेतुभिः साधितवान् विव्रितवान् उपदिष्टवान् च।

दशहेतवः के? वैखानसकल्पसूत्रस्वरूपं कीदृशं ? श्रीनिवासमखिः कीदृशः ? तस्य परिचय: कः? इत्येतान् अंशान् याथामति पत्रेऽस्मिन् प्रस्तेतुमिच्छामि।

### श्रीनिवासमखि

वेङ्कटाद्रौ वेङ्कटनाथपादकमलद्वन्द्वसमाराधनसुधीः कौशिकगोत्रजः गोविन्दाचर्यप्रसिद्धः द्विज: वसति । तस्य पत्नी तावत् रुक्मिणी । भगवतः रमाकान्तस्य अनुग्रहवशात् दम्पत्योः श्रीनिवासमखिनः त्रिंशदुत्तरचतुस्सहस्रेषु व्यतीतेषु कलिवर्षेषु सर्वजित्वत्सरे तुङ्गस्थे सवितरि तथा चन्द्रेच वैशाखे प्राजापत्ये नक्षत्रे श्लाघनीये लग्ने च जनिमलभन्त।

एते तावत् वेद-वेदाङ्ग-शास्त्राध्ययनेन सह पाकयज्ञ-हविर्यज्ञ-सोमयज्ञानुष्ठानेन यज्ञपुरुषं श्रीमन्नारायणम् आराध्य श्रीनिवासादीक्षित श्रीनिवासमखि वेदान्तदेशिक इति दिशि दिशि प्रतीता अभवन्।

एते नैकान् ग्रन्थान् विरच्य व्यासप्रणीतानां ब्रह्मसूत्रणां लक्ष्मीविशिष्टाद्वैतनाम्ना वैखानसवाङ्मयसम्बद्धं भाष्यमेकं विरचितवन्तोऽभवन्।

अथ स व्याचख्यौ विस्तरेण श्रीवैखानससूत्रम्। यत्र तस्य समस्तवेदार्थवेदिता सर्वस्मृतिज्ञता अष्टादशनिष्णातत्वं धर्मशास्त्रमर्मज्ञता अन्यच्च पाण्डित्यं प्रकटी भवति। तत्रादौ दशभिः हेतुभिः वैखानससूत्रस्य सर्वसूत्रोत्कृष्टत्वं तत् सूत्रिणां सर्वब्राह्मणोत्कृष्टत्वं च सप्रमणं प्रदर्शितम्।

इत्येतेषां श्रीनिवासमखिनां जीवनवृत्तान्तं पाण्डितीसौरभं च श्रीनिवासदीक्षितेन्द्रचरित्र[1] ग्रन्थाधारेण वयं ज्ञातुं प्रभवामः।

**दशविधहेतव**

- अखिलजगत्कारणभूतेन विखनसा प्रणीतत्वात्।
- सर्वसूत्राणामादित्वात्।
- सर्वकर्मसु श्रुतिमार्गानुसारित्वात्।
- समन्त्रकसर्वक्रियाप्रतिपदाकत्वात्।
- निषेकसंस्करादिमत्वात्।
- अष्टादशशारीरसंस्कारप्रतिपादकत्वात्।
- साङ्गक्रियाकलपवत्वात्।
- मन्वाद्यैः स्वीकृतत्वात्।
- अखिलजगदेककारणभूत श्रीमन्नारायणैकपरत्वात्।
- तत् सुत्रोक्तधर्मानुष्ठानवतामेव भगवत् प्रियतमत्वोपपत्तेश्च।

**एतान् दशहेतुन् साङ्गोपङ्गं विव्रितुमिच्छामः।**

- **अखिलजगत्कारणभूतेन विखनसा प्रणीतत्वात्:** समस्तजगज्जन्मस्थितिध्वंसमाहानन्दैकहेतोः भगवतः परब्रह्मणो नारायणस्य वैखानसादिशब्दवाच्यत्व सम्भवात् तन्नाभिनलिनसञ्जातस्य ब्रह्मणोऽपि अङ्गादङ्गादिति[3] मन्त्रोक्तप्रकरेण वैखानसदिशब्दवाच्यत्वमुपपद्यते।

    अन्तर्हितानां खननाद्वेदानान्तु विशेषतः।
    स विभुः प्रोच्यते स वै विखना ब्रह्मवादिभिः।[4]
    भगवति नारायणे वैखानसशब्दप्रयोगः प्रतिपादितः।

विष्णुसहस्रनामभाष्ये वैखानशब्दविचारे श्रीमहाविष्णुः धरणीं विशेषेण खनित्वा पातालवासिनं हिरण्याक्षं वाराहं रूपमास्थाय जघान। वेदान्ततत्त्वमीमांसादिनि खननं कृतवान् हरिः। नाम्ना विखनसं प्राहुः यं च वैखानसं तथा। एतेन श्रीमहविष्णुः एव विखनसशब्दवाच्येन प्रसिद्धोऽभूत्।
अखिलजगत्कारणभूतः श्रीविखनाः इति कारणात् तेन प्रणीतं श्रीवैखानसकल्पसूत्रम् अत्यन्तम् उत्कृष्टं प्रामाणिकम् अपौरुषेयं च भवतीति वक्तुं निश्चप्रचः।

- **सर्वसूत्राणामादित्वात्:** मुखादिन्द्रश्चाग्निश्च[5] इति श्रुतिवचनमाधारीकृत्य परमपुरुषमुखज्जातस्याग्नेः औपासनाग्निरिति नामासीत्। तत् औपासनाग्निकुण्डविधानं सर्वं वैखानससूत्रे एव द्रष्टव्यम्।
  सूर्यस्य चतुरश्रमण्डलकल्पनं वैखानसूत्रे[6] एव प्रोच्यते। सूर्यसावर्णिकमन्वन्तरादारभ्य सूर्यमण्डलस्य वृत्ताकारत्वप्रतीतिः प्रसिद्धा। तदनुसारं बोधायनादिभिः[7] वृत्ताकारत्वप्रतिपादनद्वारा इदं वैखानससूत्रं सर्वसूत्राणामादिमं भवतीति निश्चप्रचः।
  सर्वसूत्राणामादित्वात् अयं हेतुः एभिः कारणैः संसाधितः विव्रितश्च।

- **सर्वकर्मसु श्रुतिमार्गानुसारित्वात्:** "ऋग्वेदः प्रीणातु" इत्यादिना शुद्धाचमनविधौ सूर्यश्च आपोहिष्ठा अर्घ्यप्रदानविधौ मन्त्राः आघारकर्म नवग्रहहोमः अर्चनं पञ्चमूर्तिविधानं एतान् सर्वं श्रुतिमार्गानुसारित्वात् अस्य वैखानससूत्रस्य सर्वसूत्रोत्तमत्वं सिद्ध्यति।[8]

- **समन्त्रकसर्वक्रियाप्रतिपादकत्वात्:** नित्यानुष्ठानविधौ ब्रह्मयज्ञे पुण्याहे अन्तहोमे नान्दीकमुखपूर्वक उपनयनादिषु शारीरसंस्कारेषु स्थालीपाकादिषु अपरक्रियायां च समन्त्रकत्वं प्रत्यपादयत्।
  समन्त्रकसर्वक्रियाप्रतिपादनद्वारा पूर्णत्वादेव सर्वसूत्रोत्तमत्त्वं चास्य सूत्रस्य सिद्धमिति निरूपतः अयं हेतुः।

- **निषेकसंस्करादिमत्वात्:** निषेकविषयेऽपि उत्पत्यसंभवात् सङ्कल्प-दर्शन-स्पर्शन-दृष्टिप्रसारणेति कर्मभिः वधूमुखेक्षणद्वारा प्रजासाधनार्थं भवतु इति धिया उद्दिष्टः निषेकसंस्कारः। असौ संस्कारः आदौ वैखानससूत्रे एव उपदिष्टः। इतरेषु सूत्रेषु निषेकं विना गर्भाधानसंस्कारं आदौ उपदिष्टत्वात् अस्य सूत्रस्य वैलक्षण्यं उत्कृष्टत्वं च निरूपितो वर्तते अनेन हेतुना।

- **अष्टादशशारीरसंस्कारप्रतिपादकत्वात्:** प्लवाह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म।
  इति श्रुतिवचनरीत्या[9] अष्टादशसंख्या वैशिष्ट्यं सुष्टु उपदिष्टं वर्तते।
  अष्टादशपुराणानि अष्टादशपर्वाणि अष्टादश स्मृति – ज्योतिषशास्त्रग्रन्थकर्तारः सन्तीति आर्षवाङ्मयमुपदिशति ।एतदष्टादशसंख्या वैशिष्ट्यं मनसि निधाय वैखानसकल्पसूत्रे[10]

  अथ निषेकादि संस्कारान् व्याख्यास्यामः।

ऋतुसङ्गमन-गर्भाधान-पुंसवन-सीमन्त-विष्णुबलि-जातकर्मोत्थन-नामकरण-अन्नप्राशन-प्रवासगमन-पिण्डवर्धन-चौल-उपनयन-पारायण-व्रतबन्धविसर्गोपाकर्म-समावर्तन-पाणिग्रहणनीत्यष्टादशसंस्काराः शारीराः।
इति अष्टादशसंस्कारप्रतिपादकत्वात् अस्य सूत्रस्य श्रेष्ठत्वं सर्वोत्कृष्टत्वञ्चोपपद्यत इति निरूपितो अयं हेतुः।

- **साङ्गक्रियाकलपवत्वात्:** अङ्कुरार्पण-शताभिषेक-अग्निद्वयसंसर्ग-पुत्रपरिग्रह -ब्रह्ममेध-वृषोत्सर्जनादि प्रतिपादनेन साङ्गक्रियाकलापवत्वं उपदिष्टमभूत् वैखानसकल्पसूत्रे[11] अनेन अनन्तस्थिरफलप्राप्तिः प्रदर्शिता। अतः सूत्रान्तरनैरपेक्ष्यात् सर्वसूत्रोत्तमत्वं स्वातन्त्र्यञ्च घटत इति निरूपितः सप्तमो होतुः।

- **मन्वाद्यैः स्वीकृतत्वात्:** मनु-व्यास-गौतम-यम-शङ्खलिखित-हारीत-वसिष्ठ-बोधायन-आपस्तम्बादयः स्वीयग्रन्थेषु वानप्रस्थाश्रमधर्मप्रसंगे श्रीवैखानससूत्रोक्त वानप्रस्थधर्मा एव ग्राह्या ते अत्यन्तं मूर्धन्यभूता इति उद्घोषितवन्तः ते।
  अनेन अस्य श्रीवैखानसूत्रस्य अखिलशिष्टपरिगृहीतत्वमस्तीति साधित अयं हेतुः।

- **अखिलजगदेककारणभूत श्रीमन्नारायणैकपरत्वात्**

  नारायणपरायणो निर्द्वन्दो मुनिः[12]
  विष्णोर्नित्यार्चा सर्वदेवार्चना भवति[13]
  तद्विष्णोः परमं पदं गच्छतीति विज्ञायते[14]

इत्यादि सूत्रवाक्यैः उपक्रम-उपसंहारयोः मध्ये च सर्वत्र सर्वक्रियासु श्रीमन्नाराणैकपरत्वप्रतिपादनात् सूत्रमिदं परमैकान्तित्वं श्रीमन्नारायणैकपरत्वं भवतीति नवमो हेतुर्निरूपितः।

- **सूत्रोक्तधर्मानुष्ठानवतामेव भगवत् प्रियतमत्वोपपत्तेश्च[2]**

  तेषां वैखानसो वरः।[15]
  वैखानसा वा ऋषय इन्द्रस्य प्रिया आसन्।[16]
  अनन्यशरणा राजन् तस्माद्वैखानसा वराः।[17]

इति प्रतिपादितरीत्या वैखानसाः विष्णोः प्रियतमा भवन्ति।
वैखानसानामेव परमैकान्तित्वं भगवत्प्रियतमत्वञ्चोपपद्यते इति निरूपितः दशमो हेतुः।

**उपसंहार**

एभिः दशभिः हेतुभिः विखनोमुनिप्रणीतं श्रीवैखानसकल्पसूत्रं सर्वसूत्रेषु आदिमम् उत्कृष्टं दैविकं श्रीमन्नारायणपारम्यम् अद्वितीयं श्रुतिमार्गोपेतं साङ्गक्रियाकलापसहितं सर्वैः मानितं भवतीति राद्धान्तोऽयमंशः।

वैखानसार्य दिव्याज्ञा वर्धतामभिवर्धताम्।।

**सन्दर्भग्रन्थ सूची**


1. श्रीनिवासदीक्षितेन्द्रचरितम्, वैखानसविद्यानिलयम्-हैदराबाद्-2006
2. दशविधहेतुनिरूपणम् – पृष्ठम् 2
3. कृष्णयजुर्वेदः (एकाग्नि) 2,12,1.
4. आनन्दसंहिता
5. पुरुषसूक्तम्
6. 4,13
7. बौधायनीयप्रयोगरत्नमाला
8. वैखानसगृह्यसूत्रम्
9. मुण्डकोपनिषत् 2-7
10. 1,1,-2
11. वैखानसगृह्यसूत्रम्
12. वैखानसगृह्यसूत्रम् 1,1-16
13. तत्रैव 4,10
14. तत्रैव
15. वराहपुराणम्
16. ताण्ड्यब्राह्मणम् 14.4.7
17. कूर्मपुराणम्
18. दशविधहेतुनिरूपणम्, तिरुमलतिरुपतिदेवस्थानम्, तिरुपतिः-1997
19. श्रीविमानार्चनाकल्पः, तिरुमलतिरुपतिदेवस्थानम्, तिरुपतिः-2022
20. श्रीवैखानसकल्पसूत्रम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-2009